अनुक्रमांक | | | | | | | | मुद्रित पृष्ठों की संख्या–06

105 2024

# संस्कृतम्

अवधिः– होरा त्रयम् पूर्णांकाः – 80

## खण्ड – 'क' (अपठितांश– अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–
(निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए)

धन्यः अयं भारतदेशः यत्र समये समये स्वानामधन्याः बहवः महापुरुषाः समुत्पन्नाः। एते महापुरुषाः स्वीकयं समग्र जीवनं राष्ट्र सेवायां समर्पयामासुः। एतेषु प्रातः वन्दनीयेषु गुरूकुल–कांगड़ी–विश्वविद्यालयः संस्थापकस्य स्वामिश्रद्धानन्दस्य स्थानं उत्कृष्टतमं वर्तते। यौवने विषय–वासना पंके निमग्नोऽपि मुंशीरामः तीव्रतपसा साधनया श्रद्धया च बभूव महात्मा मुंशीरामः तदनु स्वामिश्रद्धानन्द सरस्वती इति नाम्ना जगति विश्रुतः जातः। तस्य स्वामिनः जीवनं चन्द्रमसः कलेव तथा दीप्तिमत बभूव, यथा सर्वो दिशः तस्य प्रकाशेन प्रकाशितः अभवत्।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) – 1/2x4=2

(i) कः देशः धन्यः अस्ति ?

(ii) स्वकीयं समग्रजीवनं राष्ट्र सेवायाम् के समर्पयामासुः ?

(iii) गुरूकुल कांगडी विश्वविद्यालयस्य संस्थापकस्य कि नाम अस्ति ?

(iv) स्वामिश्रद्धानन्दस्य स्थानं कीदृशं वर्तते ?

(ख) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) – 1x2=2

(i) यौवने विषयवासनापंके निमग्नोऽपि कः महात्मा मुंशीरामः बभूव ?

(ii) महात्मा मुंशीरामः केन नाम्ना जगति विश्रुतः जातः ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत ( निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1x3=3

(i) 'महात्मा मुंशीरामः' अत्र विशेषणपदं किम् ?

(ii) 'चन्द्रस्य' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ?

(iii) 'प्रसिद्व' इत्यस्य समानार्थकं पदं गद्यांशात् चित्वा लिखत्।

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । – 1
(इस गद्यांश के लिए समुचित शीर्षक लिखिए) –

## खण्ड – 'ख' (संस्कृतेन रचनात्मकं कार्यम्)

2. मंजूषातः पदानि चित्वा रिक्तस्थानानि पूरयित्वा प्रार्थनापत्रम् उत्तरपुस्तिकायां लिखत। 1/2x8=4
(मंजूषा से उचित पद चुनकर रिक्त स्थानों की पूर्ति कर प्रार्थनापत्र उत्तरपुस्तिका में लिखिए)

मंजूषा– | अनुगृहणन्तु, सेवायाम्, अनुमतिम्, निवेद्यते, कर्तुम्, सह, द्वादशकक्षायाः, विषयस्य |

(i)..........................
प्रधानाचार्यः
डी एन माध्यमिक विद्यालयः
रूडकी (हरिद्वारम्)।
महोदयः

सविनयं (ii)........................यत् वयं राजनीति विज्ञानस्य ((iii) .................छात्राः स्मः । 'ऐतिहासिक स्थलानां भ्रमणाय' आगरानगरस्य यात्रां (iv)......................इच्छामः।

अस्माकं राजनीति विज्ञान शिक्षकः अपि अस्माभिः (v)............गमिष्यति। तस्य स्वीकृतिः अपि अस्ति।
सम्प्रति भवताम् (vi).............. अपेक्ष्यते।
कृपया अनुमतिं प्रदाय (vii)..........................।

भवतां शिष्याः
(viii)..........

3. मंजूषायां प्रदत्त शब्दसूची साहाय्येन अधोलिखितां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत। 1/2 x 8= 4

(मंजूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा को पूर्ण कर उत्तरपुस्तिका में पुनः लिखिये।)

एकस्मिन वनप्रदेशे मानसोल्लास नाम (i)..........................आसीत। अयं सत्यवचनः परम (ii)........................च। तस्य आश्रमे सर्वे पशवः ((iii) ................. वैरभाव विस्मृत्य मोदेन कीडन्ति स्म। व्याघ्रः वृषभेण सह (iv)...................... कीडति स्म। सर्पः नकुलेन सह (v)................स्म। ऐषा वार्ता स्वर्गे स्थितस्य इन्द्रस्य कर्णपथम् आगता। तेन चिन्तितं यदि एतस्य कारुणिकस्य (vi)..............व्यानुयात् तर्हि मम् एतत् (vii).........................अपि समाप्तिं गच्छेत्। अयं ऋषिवर मम् पदं आक्रयेत। अतः अचिरात् एवं प्रतिबन्ध कोपायः (viii).............मया इति।

मंजूषा – ऋषिः, पारस्परिकम्, कारूणिकः, प्रत्यहं, नृत्यति, भूमण्डलम्, चिन्तनीयः, इन्द्रपदम्।

4. अधोलिखितेषु एकं विषयमधिकृत्य चत्वारो वाक्यं संस्कृतभाषायां लिखत ? 4

(नीचे लिखे किसी एक विषय पर चार वाक्यों को संस्कृतभाषा में लिखिए।)

(i) विद्याधनं सर्वधनं प्रधानम्
(ii) परोपकारः
(iii) सत्संगतिः
(iv) कविकुलगुरूः कालिदासः

## खण्ड – 'ग' (अनुप्रयुक्त व्याकरणम्)

5. अधोलिखितेषु वाक्येषु रेखांकित पदेषु सन्धि–विच्छेदं कुरूत– 1x5=5

(निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि–विच्छेद कीजिए)

(i) यान्यनवद्यानि कर्माणि तानि सेवितव्यानि।
(ii) जगच्चक्षुषि भास्करे।
(iii) गम्भीरस्वरेणैवम् अवादीत्।
(iv) भिक्षावटुनानुगम्यमानः संन्यासी दुष्टः।
(v) आचार्योऽन्तेवासिनमनुशास्ति।

6. अधोलिखितेषु वाक्येषु रेखांकितपदानां विग्रहाः लेखनीयाः– 1x5=5

(निम्नलिखित वाक्यों में रेखांकित पदों का विग्रह कीजिए)

(i) सत्याय मितभाषिणम्।
(ii) आचार्यदेवो भव।
(iii) मान्धाता च महीपतिः ।
(iv) यस्याः शक्रसमो भर्ता ।
(v) यानि अनवद्यानि कर्माणि।

7. निम्नेलिखितेषु वाक्येषु कोष्ठकान्तर्गत प्रकृति – प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत– 1x6=6

(निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ प्रत्यय जोड़कर खाली स्थान भरिए)

(i) स्वाधीनताऽऽर्यभुवि .................... समाना । (मूर्ति + मतुप् स्त्री0)
(ii) राजभवनं................................(गम् + क्त्वा) वत्सराजो राजानं प्राह।
(iii) न दुर्जनः .........................उपैति। (सज्जन + तल् )
(iv) रामायणः एकः ( इतिहास + ठक् ) ..............................महाकाव्यः अस्ति।
(v) हस्तेनैव........................... (वि + सृज् + क्त)
(vi) भार्याभर्तुः .........................भवति (सहाय + णिन्)

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् – 1x4=4

(निम्नलिखित वाक्यों में कर्ता और क्रिया पदों की अन्विति कीजिए)

(i) नैकेनापिं सम.........................वसुमति। (गतः, गता, गतम् )

(ii) अल्पज्ञः एव..............................प्रलपति । (पुरुषः, पुरुषाः, पुरुषौ)

(iii) ..................................राजा मुंजः । (सन्तुष्टा, सन्तुष्टम्, सन्तुष्टो)

(iv) शाटीव सा................... काचनहल्दिघाटी । (जयति, जयती, जयतः )

**अथवा**

अधोलिखितेषु वाक्येषु विशेषणविशेष्ययोः अन्वितिः क्रियताम–

(निम्नलिखित वाक्यों में विशेषण विशेष्य की अन्विति कीजिए)

(i) स्वप्रकृत्यनुकूलः........................ .अपि प्राप्यते। (वरः / वराः )

(ii) पुष्पंफलं तदनु..............................समीरः । (गन्धवहः / गन्धवहम्)

(iii) शोकसन्तप्तः..............................प्रायश्चित्तं कर्तुं आत्मनो वह्नौ प्रवेशनं निश्चितवान्। (मुंजः / मुंजम्)

(iv) नोत्सहे...................................... काले वारयितुमत्र भवतीम्। (श्लाघनीयं / श्लाघनीये)

9. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत शब्देषु उपपद विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत– 1x4=4

(नीचे लिखे वाक्यों में कोष्ठक में दिये गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके रिक्त स्थान पूर्ण कीजिए )

(i) मे पुत्रं मुंजः........................विषादिनामारयिष्यति। (राज्यलोभम्)।

(ii) ............................मा प्रमदः। (स्वाध्याय)

(iii) दीर्घप्रयासेन कृतं हि वस्तु ........................भजेद विनाशम्। (निमेषमात्र )

(iv) ....................पक्षनिवहेनखमाहसन्तः । (नील )

## खण्ड – 'घ' (पठितांष अवबोधनम् भाग–I)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत–

(नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिये)

पुरा धाराराज्ये सिन्धुल – संज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वार्धक्ये भोज इति पुत्रः समजनि। सः यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुंजं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास–यद्यहं राज्यलक्ष्मीभारधारणसमर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः। अथ वा बालं मे पुत्रं मुंजो राज्यलोभाद्विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा। पुत्रहानिर्वंशोच्छेदश्च इति विचार्य राज्यं मुंजाय दत्त्वा तदुत्सङ्गे भोजमात्मानं मुमोच।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) 1/2x2=1

(i) सिन्धुलः कस्य राज्यस्य राजा आसीत् ?

(ii) मुंजः केन भोजं मारयिष्यति ?

(ख) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) 1

(i) भोजः कस्य पुत्रः आसीत् ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) 1x3=3

(i) 'नाम' इत्यर्थे कि पदं प्रयुक्तम् अत्र ?

(ii) 'पर्यपालयत्' अत्र प्रयुक्तः उपसर्गः किम् ?

(iii) 'निन्दा' अस्य पर्यायवाचि पदं किम् अत्र प्रयुक्तम् ?

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत –

(नीचे लिखे नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए)

ऋतध्वजः – आम्! अत एवं प्रष्टुमुत्सहे किं गन्धर्वराज–विश्वावसुभहाभागाः अपि स्वपत्नीं युधिष्ठिर इव हरितवन्तः हरिश्चन्द्र इव विक्रीतवन्तः ?

कुण्डला – मदालसे तूष्णीं किमर्थं तिष्ठति देहि प्रत्युत्तरम्।

ऋतध्वजः– एकस्य अपराधेन सर्वाजातिः दण्ड्या इति विचित्रो न्यायः तव सख्याः।

मदालसा – अत्र भवन्तः नारीस्वाधीनतामाधिकृत्य किं कथयन्ति ?

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए)– 1/2x2=1

(i) कः स्वपत्नीं हारितवान् ?

(ii) मदालसायाः न्यायः कीदृशः ?

(ख) पूर्ण वाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए)– 1

(i) ऋतध्वजः कि प्रष्टुम् उत्साहितः ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए)– 1x3=3

(i) 'अद्भुतः' इत्यर्थे किं पदं प्रयुक्तम् अत्र ?

(ii)) 'नारीणां स्वाधीनता' अत्र समासं कुरुत ?

(iii) 'विचित्रः' पदंस्य विशेषणम् अस्ति ?

12. अधोलिखितश्लोकौ पठित्वा प्रश्नान् उत्तरत –

(नीचे लिखे श्लोकों को पढ़कर प्रश्नों के उत्तर दीजिए)–

कर्णामृतं सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलानाम् ।
निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव ।।
उत्साह–सम्पन्नमदीर्घसूत्रम् क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः ।।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए)– 1/2x2=1

(i) कण्टकजालं कः निरीक्षते ?

(ii) क्रमेलकः कुत्र कण्टकजालं निरीक्षते ?

(ख) पूर्ण वाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए)– 1

(i) किमर्थं लक्ष्मीः उत्साहसम्पनं समीपं स्वयं याति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए)– 1x3=3

(i) उष्ट्रः इति पदस्य पर्यायवाची पदम् अत्र किं प्रयुक्तम् ?

(ii) 'कृतघ्नम्' अस्य पदस्य विलोम पदम् अत्र किम् ?

(iii) 'कर्णामृतम्' अस्य सन्धिविच्छेदं कुरुत ?

13. निर्देशानुसारं प्रश्नान् उत्तरत –

(निर्देशानुसार प्रश्नों के उत्तर दीजिए)– 1/2+1/2 =1

(क) मातृदेवो भव । पितृदेवो भव। आचार्य देवो भव।
यानि अनवद्यानि तानि सेवितव्यानि। नो इतराणि।

(i) उपर्युक्त पंक्तिः पाठ्यपुस्तकस्य कस्मात् पाठात् उद्धृताः ?

(ii) एषा पक्तिः मूलरूपेण कस्मात् ग्रन्थात् संकलिताः ?

(ख) ' नैकेनापि समं गता वसुमती नूनं त्वया यास्यति।' 1/2+1/2=1

(i) एषा पंक्तिः कस्मात् ग्रन्थात् उद्धृतः ?

(ii) अस्य लेखकः कः ?

14. अधोप्रदत्त भावार्थत्रये शुद्ध भावार्थस्य चयनं कृत्वा लिखत–

(नीचे दिये गये भावार्थो में से शुद्ध भावार्थ का चयन कर लिखिए)–

(क) अहो 'शोभनम्' गन्र्धवराज विश्वावसोः राजोद्यानम्। 1+1=2

(i) गन्धर्वराजविश्वावसोः उद्यानम् शोभते।

(ii) गन्धर्वराजविश्वावसोः राजोद्यानम् मनोहरम् अस्ति।

(iii) गन्धर्व देशस्य विश्वावसोः राजोद्यानम् अतीव शोभते।।

(ख) अपौरुषेय श्रुतिः।

(i) पुरुषस्य श्रोतं न भवति।

(ii) यः पुरुषः न भवति तस्य श्रोतं न भवति।

(iii) श्रुतिः अर्थात वेदः व्रह्ममुखनिर्गतधर्मज्ञापकः अस्ति।

अथवा

अधोदत्त श्लोकस्य प्रदत्तभावार्थं मंजूषा प्रदत्तपदैः पूरयित्वा लिखत–

(नीचे दिये गये श्लोक के भावार्थ को मंजूषा में दिये गये पदों से पूर्ण करके लिखिए) 1/2x4=2

एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।
आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी ।।

अस्मिन् संसारे एकलः विद्यावान (i) ...................च सुपुत्रः तथैव सम्पर्णं कुलम् आनन्दयति, यथा शशिः (ii) ........................... भूत्वा समस्तमपि भूमण्डलम् (iii) .......................... । यद्यपि रात्रौ लक्षाधिकाः तारकाः अपि तत्कार्यं कर्तुं न (iv) .............................भवन्ति।

मंजूषा– | प्रकाशवान्, सज्जनः, समर्थः, प्रकाशयति |

15. अधोलिखित श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत –
(नीचे दो श्लोकों का अन्वय दिया गया है। उनमें रिक्त स्थानों की पूर्ति करके अन्वय पुनः लिखिए)।

(क) यस्याः शक्रसमो भर्ता मया पुत्रवती च या । $\frac{1}{2}$x4=2
फले कस्मिन् स्पृहा तस्या येनाकार्यं करिष्यति ।।

अन्वयः – यस्याः भर्ता (i)............................. मया च या (ii)............................. अस्ति (iii) ............................. कस्मिन् फले स्पृहा येन(Iv) ........................करिष्यति।

(ख) त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्। $\frac{1}{2}$x4=2
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ।।

अन्वयः – (रघवंशिनः)सम्भृतार्थानां (i) ..........................मितभाषिणाम (ii)................................विजिगीषूणां. (iii).............
..................गृहमेधिनाम् (iv).............................(अभवन्)।

16. अधोलिखितानां 'अ' स्तम्भस्य वाक्यांशानां 'ब' स्तम्भस्य वाक्यांशैः सह उचित मेलनं कुरुत–
(निम्नलिखित 'अ' स्तम्भ में प्रदत्त वाक्यांशों का 'ब' स्तम्भ में दिए गये वाक्यांशों के साथ उचित मिलान कीजिए) $\frac{1}{2}$x4=2

| स्तम्भ 'अ' | स्तम्भ 'ब' |
|---|---|
| (क) आकारसदृशप्रज्ञः | (i) द्वारं नाशनमात्मनः |
| (ख) अनेकसंशयोच्छेदि | (ii) नूनं त्वया यास्यति |
| (ग) नैकेनापि समं गता वसुमती | (iii) प्रज्ञया सदृशागमः |
| (घ)त्रिविधं नरकस्येदं | (iv) परोक्षार्थस्य दर्शकम् |

17. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत–1x3=3
(अधोलिखित वाक्यों में रेखांकित शब्दों के प्रसङ्गानुसार उचित अर्थ कोष्ठक से चुनकर लिखिये।)
(क) अल्पज्ञ एवं पुरुषःप्रलपित अजस्रं। (निरन्तरं/यदा–कदा)
(ख) शरीरे अरिः प्रहरति । (मित्रम्/शत्रुः)
(ग) पिको वसन्तस्य गुणं न वायसः । (काकः/मयूरः)

## खण्ड – 'घ'(संस्कृत साहित्य–परिचयः भाग–।।)

18. अधोलिखितानां प्रश्नानां उचितं विकल्पं चित्वा लिखत
(निम्नलिखित प्रश्नों के उचित विकल्प चुन कर लिखिए) 1x8=8
(1) अश्वघोषस्य जन्मः अभूत् – 1x1=1
(क) साकेते (ख) कश्मीरदेशे (ग) उज्जयिन्यां (घ) काश्यां

(2) पण्डित अम्बिकादत्त व्यासः कुत्र अजयात् – 1x1=1

(क) काश्यां (ख) जयपुर नगर्यां (ग) उदयपुरे (घ) प्रयागे

(3) वेदकुमारी घई कदा जाता – 1x1=1

(क) एकोनविंशतिशताब्द्यां (ख) विंशतिशताब्द्यां (ग) एकविंशतिशताब्द्यां (घ) अष्टादशशताब्द्यां

(4) भर्तृहरिः कदा अजायत् – 1x1=1

(क) प्रथमशताब्दी ई0पू0 (ख) चतुर्थ शताब्दी ई0पू0 (ग) प्रथम शताब्दी ई0 (घ) चतुर्थ शताब्दी ई0

(5) बुद्व चरितम् महाकाव्यम् अस्ति । 1x1=1

(क) भाषस्य (ख) अश्वघोषस्य (ग) व्यासस्य (घ) कालिदासस्य।

(6) हितोपदेशः रचयिता............................अस्ति। 1x1=1

(क) नारायणः पंडितः (ख) विष्णुशर्माः (ग) नारायण (घ) विल्हणः

(7) दुष्यन्तः नायकः अस्ति – 1x1=1

(क) धीरोदात्तः (ख) धीरोद्धत्तः (ग) धीरललितः (घ) धीरप्रशान्तः

(8) 'अभिज्ञानशाकुन्तलम्' नाटके शकुन्तलायाः पालनं केन कृतम्– 1x1=1

(क) कण्व ऋषिना (ख) मरीचि ऋषिना (ग) याज्ञवलक्य ऋषिना (घ) दुर्वासा ऋषिना

नोट– यह आवश्यक नही है कि समस्त बहुविकल्पीय प्रश्न प्रश्न सं0 18 से ही पूछे जायें।